शब्दार्णव *An International Peer Reviewed Refereed Journal of Multidisciplinary Research*
वर्ष–6, अंक–12, भाग–3, जुलाई–दिसम्बर, 2020 | **ISSN: 2395-5104**

# लक्षणग्रन्थानुसारेण महाकाव्यलक्षणविश्लेषणम्

• **Dr. A. GUNASEELAN**

संस्कृतसाहित्ये गद्य-पद्य-चम्पू-दृश्य-श्रव्याद्यनेके प्रकाराः विराजन्ते। साहित्यदर्पणकारस्य विश्वनाथस्य मतानुसारम् इन्द्रियग्राह्यत्वेन हेतुना काव्यं द्विविधं भवति। तन्मते दृश्यकाव्यं श्रव्यकाव्यञ्च। साहित्यदर्पणकारः विश्वनाथः षष्ठपरिच्छेदे उक्तवान् "दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्"[1]इति श्रव्यकाव्यस्य श्रवणदृष्ट्या च योग्यता वरीवर्ति। रूपकं तु दृश्यकाव्यपर्यायवाचि। महाकाव्यं खण्डकाव्यं चम्पूकाव्यादि भेदाः श्रव्यकाव्यभेदवाचिनः। दृश्यकावम् आङ्गिक – आहार्य – सात्त्विकाभिनयैः अन्तर्भूतं भवति। श्राव्यकाव्ये केवलं वाचिकविषयम् अन्तर्भूतं भवति। श्रव्यकाव्यं पुनः गद्यपद्यभेदेन द्विधाविभक्तम्।' श्रव्यं श्रोतव्यमात्रं तत् पद्यगद्यमयं द्विधा '[2]। छन्दोबद्धपादयुक्तं वाक्यं पद्यनाम्ना अभिधीयते।

छन्दोमञ्जरीग्रन्थे पादबद्धश्लोकोऽपि पद्यनाम्ना अभिधीयते।गङ्गादासेन उक्तं यत् पद्यं चतुष्पदी इति। अर्थात् पादचतुष्टयबद्धः श्लोकविशेषः पद्यमिति उच्यते। वैष्णवाचार्यः बलदेवविद्याभूषणः तस्य छन्दः कौस्तुभग्रन्थस्य टीकायामकथयत् – छन्द्यन्ते ग्रथ्यन्ते पद्यानि एभिरिति छन्दासि अर्थात् गायत्री उष्णिक् अनुष्टुभादि छन्दोबद्धपदसमूहः पद्यनाम्ना व्यवह्रियते। अत्र पदं नाम व्याकरणशास्त्रानुसारेण सुप्तिङन्तं पदमिति। तत्र टीकाकारेण पद्यस्य लक्षणम् उच्यते यथा – गायत्र्याद्यन्यतमेन छन्दसा बद्धानि नियमितानि पदानि सुप्तिङन्तरूपाणि यत्र तत्तादृशं काव्यं पद्यमिति पद्यसामान्यलक्षणमिति पद्यात्मकं काव्यं मुक्तक – युग्मक – सन्दानिक – कलापकादि भेदेन विभक्तम्।

**छन्दोबद्धपदं पद्यं तेनैकेन च मुक्तकम्।**
**द्वाभ्यान्तु युग्मकं सन्दानितकं त्रिभिरिष्यते।**
**कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम्।।**[3]

पद्यकाव्यमपि द्विविधं भवति। 1. अनिबद्धकाव्यम्, 2. प्रबन्धकाव्यम् इति। अनिबद्धकाव्ये कस्यापि सुनियोजितकथाबन्धस्य आवश्यकता न भवति। पद्यानि व्यस्तानि भवन्ति।

**प्रबन्धकाव्यम्** - यस्मिन् काव्ये सुनियोजितायाःकस्यश्चित् कथायाः समावेशो भवति तदेव प्रबन्धकाव्यमितिउच्यते।

एतादृशः विभागः न क्वापि ग्रन्थेषु दृष्टः तथापि विमर्शकाः इत्थं चिन्तयन्ति। पुनः प्रबन्धकाव्यं दिविधं भवति महाकाव्यम्, खण्डकाव्यमिति।

**महाकाव्यम्** – सर्गैरवान्तरार्थवर्णनैरुपलक्षितो बन्धः रस वत्पद्यकदम्बविन्यासो महाकाव्यम्। साहित्यदर्पणकारेण विश्वनाथेन साहित्यदर्पणस्य षष्ठपरिच्छेदे महाकाव्यस्य लक्षणमेवमुक्तम् –

**सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः।**
**सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः।।** [4]

---

• **Head and Assistant Professor, Department of Sanskrit, Sourashtra College, Madhurai.**

**एकवंशभवा भूपाः कुलजा बहवोऽपि वा।**
**श्रृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते।।**[5]

अर्थात् धीरोदात्तगुणयुक्तः कोऽपिदेवपुरुषः देववंशसम्भूतो वा नायको भवेत्। एकवंशोत्पन्नाः कुलीनाः धीरोदात्तगुणयुक्ताः एको वा बहवः क्षत्रियाः नृपाः अपि नायकाः भवितुमर्हन्ति। साहित्यदर्पणकारः तृतीयपरिच्छेदे धीरोदात्तनायकलक्षमकथनप्रसङ्गे आह –

**अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः।**
**स्थेयान् निगूढमानो धीरोदात्तो दृढव्रतः कथितः।।**[6]

रघुवंशमहाकाव्ये एकाधिका सूर्यवंशजाः नृपाः नायकाः दृश्यन्ते। शृङ्गारवीरशान्तेषु रसेषु कोऽपि एको रसः प्रधानरसः भवेत्। अन्ये अङ्गरसाः स्युः। शृङ्गारर सप्रधानमहाकाव्यस्य उदाहरणम् यथा नैषधीयचरितम्। शिशुपालवधं तु वीररसप्रधानं, महाभारतं शान्तरसप्रधानञ्च।

साहित्यदर्पणे लक्षणोल्लेखः इत्थमस्ति –

**अङ्गानि सर्वेऽपि रसास्सर्वे नाटकसन्धयः।**
**इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम्।।**
**चत्वारस्तस्य वर्गाः स्युस्तेष्वेकञ्च फलं भवेत्।**
**आदौ नमस्क्रियाऽऽशीर्वा वस्तुनिर्देश एव वा ।।**
**क्वचिन्निन्दा खलादीनां सताञ्च गुणकीर्तनम्।**
**एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः।।**[7]

महाकाव्यं पञ्चसन्धिसमन्वितं भवति। अर्थात् नाटकवत् महाकाव्ये मुखम् , प्रतिमुखम्, गर्भः, विमर्शः, उपसंहृतिश्चेति पञ्चसन्धयः भवन्ति। ऐतिहासिककथातः रामायणमहाभारतपुराणप्रसिद्धकाथाभ्यश्च सभ्यसमाजे प्रचलितकथातः वा कथासूत्रं कविः गृहणीयात् , महाकाव्यस्य मङ्गलं भाविकथासूचनात्मकं यत् आशीर्वचननमस्कारादि युतं स्यात्। आशीर्लक्षणं शब्दकल्पद्रुमे इत्थमुक्तम् ---

**वात्सल्याद् यत्र मान्येन कनिष्ठस्याभिधीयते।**
**इष्टावधारकं वाक्यमाशीः सा परिकीर्तिता।।**[8]

अर्थात् यत्र वात्सल्यवशात् ज्येष्ठः कनिष्ठं शुभकामनया स्तुतिं ज्ञापयति स एव आशीर्वादः इति कथ्यते। तत्र पुरुषार्थचतुष्टयं धर्मार्थकाममोक्षाः भवन्ति। चतुर्वर्गेषु यः को ऽपि वर्गः मुख्यरूपेण प्रदर्शितः स्यात्। अत्र आचार्यः दण्डी काव्यादर्शे महाकाव्यस्य लक्षणप्रसङ्गे इत्थमकथयत् -

**इतिहासकथोद्भूतमितरद्वा सदाश्रयम्।**
**चतुर्वर्गफलोपेतं चतुरोदात्तनायकम्।।**[9]

काव्यादर्शग्रन्थटीकाकारः रङ्गाचार्यसूरिः एवमाह – इतरद्वा इतिहासादिषु अविद्यमानं कथानकमुपजीव्य निबद्धं किन्तु सदाश्रयं सत्य भूतः वृत्तान्तः आश्रयः आधारः यस्य तत्। अनेन कल्पितस्य वस्तुनः माहकाव्ये वर्णनीयतया स्वीकारे निषेधः सूचितः। रामादिवत् प्रवर्तितव्यं न रावणादिति उपदेशार्थं खलादीनां निन्दा सज्जनानां कार्यप्रशंसा च महाकाव्ये भवति।

रघुवंशमहाकाव्ये जगतः पितरौ स्मृत्वा कविः प्रारभते –

**वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।**

**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।**[10]

मङ्गलसूचकाक्षरेण आशीर्वचनेन च रुक्मिणीपरिणयं प्रारब्धम्। वस्तुनिर्देशेन कुमारसम्भवम् , शिशुपालवधञ्च प्रारब्धम्।

**श्रियपतिः श्रीमति शासितुं जगत्**
**जगन्निवासो वसुदेवसद्मनि।**
**वसन्ददर्शावतरन्तमम्बराद्**
**हिरण्यगर्भाङ्गभुवं मुनिं हरिः।।**[11]

अष्टाधिकाः नातिदीर्धा नातिस्वल्पाः सर्गाः भवेयुः। कुत्रचित् मिश्रछन्दोऽपि भवति। प्रत्येकं सर्गसमाप्तेः प्राक् परवर्तिनः सर्गस्य विषयवस्तुसूचना भवेत्। तदुक्तम् ---

**नातिस्वल्पा नातिदीर्घाः सर्गाअष्टाधिका इह।**
**नानावृत्तमयः क्वापि सर्गः कञ्चन दृश्यते।।**
**सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत्।।**[12]

महाकाव्ये यथासम्भवम् अङ्गैः उपाङ्गैः सह सन्ध्या , सूर्यः, चन्द्रः, रात्रिः, वनं, पर्वतः, सर्गः, अध्वरः युद्धयात्रा, विवाहः, मन्त्रणादिविषयाणां वर्णना कविना उपस्थाप्यते। काव्यादर्शे एवमुक्तम् –

**नगरार्णवशैलर्तु चन्द्रार्कोदयवर्णनैः।**
**उद्यानसलिलक्रीडामधुपानरतोत्सवैः।।**[13]

इति प्रत्येकं सर्गस्य वर्णनीयविषयाणां यः सर्वापेक्षया सुन्दरः अंशः तमाश्रित्य सर्गस्य नामकरणं भवेत्। तद्याथा –

**कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा।**
**नामास्य सर्गोपादेयकथया सर्गनाम तु।।**[14]

आचार्यदण्डी काव्यादर्शे महाकाव्यस्य लक्षणकथ नप्रसङ्गे इत्थमाह – तत्र महाकाव्येऽलङ्का रणार्थं विरहः राजकुमारस्योत्पत्तिः मन्त्रणा , दूतप्रेषणम्, युद्धम्, नायकस्य श्रीवृद्धिः इत्येतत् प्रभृति विषयाणां वर्णनाः भवन्ति इति।

**विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः।**
**मन्त्रदूतप्रयाणाजि नायकाभ्युदयैरपि।।**[15]

अत्र विप्रलम्भः विप्रलम्भशृङ्गारः इति अवगम्यते। तल्लक्षणे सरस्वतीकण्ठाभरणे एवमुच्यते –

**भावो यदा रतिर्नाम प्रकर्षमधिगच्छति।**
**नाधिगच्छति चाभीष्टं विप्रलम्भस्तदोच्यते।।**[16]

तत्र महाकाव्यम् अलङ्कारेण विभूषितं भवति , कदापि महाकाव्यं संक्षिप्तं न भवेत्। रसभावपूर्णता भवेत्। रसभावपूर्णता भवेत्। श्रुतिसुखकरच्छन्दोमयसर्गसमूहेन सुरन्निबद्धं महाकाव्यं भवेत्।

एवं लक्षणग्रन्थेषु महाकाव्यलक्षणं बहुभिः बहुधा प्रतिपादितमस्ति।

**टिप्पणी**

**1.** साहित्यदर्पणम् – पृ-452

**2.** साहित्यदर्पणम् – श्लो-300
**3.** साहित्यदर्पणम् – 6-309
**4.** साहित्यदर्पणम् – 6-325
**5.** साहित्यदर्पणम् – 6-326
**6.** साहित्यदर्पणम् – 3-32
**7.** साहित्यदर्पणम् – 6- 302
**8.** काव्यादर्शः – पृ - 76
**9.** काव्यादर्शः – 1-15
**10.** रघुवंशम् 1-1
**11.** शिशुपालवधम् -1-1
**12.** साहित्यदर्पणम् – 6-302
**13.** काव्यादर्शः – 1-18
**14.** साहित्यदर्पणम् – पृ 452
**15.** काव्यादर्शः – 1-17
**16.** काव्यादर्शः – पृ – 82

**उपयुक्तग्रन्थसूची** -

**1.** साहित्यदर्पणम्- विश्वनाथः –चौखम्बासुरभारती –वाराणसी
**2.** काव्यादर्शः –दण्डिः - परिमलपब्लिकेशन्स् –दिल्ली।
**3.** रघुवंशम्–कालिदासः - चौखम्बासुरभारती –वाराणसी।
**4.** शिशुपालवधम्– माघः - चौखम्बासुरभारती – वाराणसी।

❖